# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१६

| | | |
|---|---|---|
| कक्षा- आचार्यः - १ (Sem – 2) | **प्रश्नपत्रम् - २** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड - CC 4.2.4** | समयः- ११:०० तः २:०० |
| दिनाङ्कः - १८.४.२०१६ | सन्दर्भग्रन्थः - महाभाष्यम् | |

---

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ कस्यचिदेकस्य ससन्दर्भं व्याख्या कार्या (४)**

(अ) तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्नोति। इयते चैकेनाप्यनेकस्याभिधानं स्यादिति। तच्चान्तरेण यत्नं न सिध्यति। तस्मादेकशेषः।

(आ) एकैको निद्यन्तुं भारं शक्नोति यत्कथं तत्र। एकैक कर्ता स्यात्सर्वे वा स्युः कथं युक्तम्

**प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत (१२)**

(क) प्रातिपदिकानामेकशेषः वा विभक्त्यन्तानामितिविशदं चर्च्चयत।

(ख) नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् इति एतत् सूत्रं व्याख्या

**प्रश्नः ३ त्रिषु द्वयोः उत्तरे देये (४)**

(क) सरूपाणामेकश... इत्यादिसूत्रे एकग्रहणस्य किं प्रयोजनम्?

(ख) सरूपाणामेकश... इत्यादिसूत्रे शेषग्रहणाभावे को दोषः?

(ग) सरूपाणामेकश... इत्यादिसूत्रे एकविभक्तिग्रहणाभावे को दोषः?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ४ द्वयोः एकस्य ससन्दर्भं व्याख्यानं कार्यम् (४)**

(अ) स्त्रीग्रहणेषु स्त्रीप्रत्ययग्रहणं वा स्यात्, स्त्रीग्रहणं चा स्त्रीशब्दग्रहणं वेति। किं चात? यदि प्रत्ययग्रहणं वा शब्दग्रहणं वा गार्गी च गार्ग्यायणौ च गर्गाः केन यशब्दो न श्रूयते। अस्त्रियामिति हि लुग्युच्यते।

(आ) एवं तर्हि सिद्धे सति यदिमं योगं शास्ति तज्ज्ञापयत्याचार्यो यत्रोर्ध्वं प्रकृतेर्लक्षण एव विशेषस्तत्रैकशेषो भवति इति। किमेतस्य ज्ञापने प्रयोजनम्? हंसश्च वरटा च कच्छपश्च डुली च ऋश्यच रोह्च्चेति अत्रैकशेषो न भवति।

**प्रश्नः ५ केषाञ्चित् त्रयाणां विषये टिप्पणीं लिखत (१२)**

| | |
|---|---|
| (क) अङ्गाश्रये चैकशेषवचनम्। | (घ) त्यदादीनि सर्वैर्नित्यम्। |
| (ख) वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। | (ङ) ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। |
| (ग) अविनाशोऽनैकात्म्यात्। | (च) पूर्वशेषदर्शनाच्च। |

**प्रश्नः ६ त्रिषु द्वयोः उत्तरं लेख्यम् (४)**

(क) वैरूप्यशब्दस्य कोऽर्थः?

(ख) द्वितीयान्वितौ कति सूत्राणि सन्ति?

(ग) आकृतौ किं वचनम्?

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ७ कस्यचिदेकस्य भाष्यदिशा व्याख्या कार्या** **(४)**

(अ) सुपां कर्मादयोऽर्थाः संख्या चैव तथा तिङ्गाम् इति विशदं व्याख्यात

(आ) नः क्ये इति सूत्रं विस्तरशः व्याख्येयम्।

**प्रश्नः ८ द्वयोः किमपि एकम् उत्तरयत** **(८)**

(क) परिमाणार्थं च इति भाष्यवार्त्तिकस्य सन्दर्भसहितं व्याख्यानं क्रियताम्

(ख) तसौ मत्वर्थे इति सूत्रं भाष्यदिशा विस्तरशः व्याख्येयम्

**प्रश्नः ९ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** **(३)**

(क) यस्माद्-ग्रहणां किमर्थम्?

(ख) प्रत्ययपरिभाषां लिखत।

(ग) विधिग्रहणाभावे को दोषः?

(घ) गतिदिवःकर्महेतुमत्सु इत्यस्य कोऽर्थः?

(ङ) तदादिग्रहणस्य किं प्रयोजनम्?

**चतुर्थी अन्वितिः (युनिट – ४)**

**प्रश्नः १० कस्यचिदेकस्य विषये विशदा चर्चा विधेया** **(४)**

(क) स्वतन्त्रः कर्ता।

(ख) तत्प्रयोजको हेतुश्च।

**प्रश्नः ११ द्वयोः कस्याप्येकस्य भाष्यदिशा व्याख्या विधेया** **(८)**

(क) ध्रुवमपायेऽपादानमित्यत्र ध्रुवग्रहणप्रयोजनं विलिख्य जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् इ वार्त्तिकं भाष्यानुगुणं चर्चयत।

(ख) भाष्यमाधारीकृत्य कारकविषये लघुनिबन्धो लेख्यः।

**प्रश्नः १२ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** **(३)**

(क) किन्नाम कारकम्?

(ख) षष्ठीविभक्तेः कारकत्वं वर्तते न वा?

(ग) आधारस्य कति भेदाः, के च ते इति लिखत।

(घ) तथायुक्तं चानीप्सितम् इत्यस्य सूत्रस्य आशयं लिखत।

(ङ) अपायशब्दस्य कोऽर्थः?________________